Kāñcī, mentioned in the early lists, certainly stands for modern Conjeeveram in the Chingleput District of the Madras Presidency. The Pīṭha in this case, however, is usually located on the Kopāi near Bolpur in the Birbhum District of Bengal.

5 A—नितम्बं ; B—नितम्बं कालमागधे ; I—नितम्बकालिमाधवे ।

AM— नितम्बेर अर्द्ध कालमाधवे ताँहार ।
असिताङ्ग भैरव देवता काली तार ॥

6 E—च मुक्तिदा ; G—भैरवोऽत्रासिताङ्गस्य ।

7 A—दृष्टादृष्ट ; G—दृष्टादृष्टा ।

8 ABEGI—महादेव ।

9 This verse is omitted in CF and may be a later interpolation.

शोणाख्या[1] भद्रसेनस्तु नर्मदाख्ये[2] नितम्बकः ।
रामगिरौ[3] स्तनान्यश्च[4] शिवानी चण्डभैरवः ॥ ३७ ॥
[वृन्दावने केशजालमुमा[5] नाम्नी च[6] देवता] ।
[भूतेशो भैरवस्तत्र सर्वसिद्धिप्रदायकः] ॥ ३८ ॥
संहाराख्य[7] ऊर्द्धदन्तो[8] देवी (°ऽनले) नारायणी शुचौ ।
अधोदन्तो[9] महारुद्रो वाराही पञ्चसागरे ॥ ३९ ॥

---

1 AFG—शोणाख्ये; I—शैलाख्ये; B—शोणभद्रे भद्रसेनो ।

AM— नितम्बेर आर अर्द्ध पड़े नर्मदाय ।
भद्रसेन भैरव शोणाक्षी देवी ताय ॥

AM suggests the reading शोणाक्षी भद्रसेनस्तु । There is some doubt whether the Pīṭha has to be located on the Sone or on the Narmada.

2 BCD—नर्मदाख्या नितम्बके; F—नर्मदाख्या नितम्बकम्; G—नर्मदाख्ये नितम्बके; I—नर्म्मदाख्ये नितम्बके ।

3 B—राजगिरौ; G—रामाकिन्यां; I—रामगिर्य्यां । Rāmagiri is modern Ramtek near Nagpur in the Central Province. There is also a tradition identifying Rāmagir with the Chitrakūṭa in Bundelkhand.

4 AB—तथा नासा; CDF—तथा नाला; I—स्तवान्यश्च ।

AM— आर स्तन पड़े ताँर रामगिरि स्थाने ।
शिवानी देवता चण्ड भैरव सेखाने ॥

Note that the nose of Satī is associated in verse 5 (p. 44 above) with Sugandhā.

5 B—°जालान्; CD—°जाल; EF—°जाले; G—उमानाम्नी केशजाले भूतेशः परभैरवः (with the second line of the verse omitted)

I— वृन्दावने केशजाले कृष्णनाथस्तु भैरवः ।
कात्यायनी तत्र देवी सर्वसिद्धिप्रदायिनी ॥

AM— केशजाल नाम स्थाने पड़े ताँर केश ।
उमा नामे देवी ताहे भैरव भूतेश ॥

It seems that the original reading was उमावने केशजालं भूतेशः परभैरवः ॥ Umāvana was a name of Devīkoṭṭa; cf. style of v. 27 (*supra*, p. 50, notes 1 and 3). AM supports the reading in G. In the modified text there is reference to the fanciful Śākta claim on the celebrated Vaiṣṇava *tīrtha* near Mathurā (Muttra) in the United Provinces (cf. Kṛṣṇa referred to in the I text). Keśajāla was sometimes regarded as the name of the Pīṭha owing to confusion; cf. the case of Maṇibandha in verse 32. See the confusion in the *S'ivacarita*.

6 A—नाम्नीति ।

7 ABI—संहाराख्ये ।

AM— ऊर्द्ध दन्तपाँतिर अनले हइल धाम ।
संक्रूर भैरव देवी नारायणी नाम ॥

AM suggests the reading संक्राराख्य ऊर्द्धदन्तोऽनले । The *S'ivacarita* regards *Saṃhāra* as the name of an Upapīṭha; cf. ABI.

8 ACFGI—ऊर्द्धदन्तो ।

9 ACFGI—अधोदन्तो ।

करतोयातटे तल्पं (कर्णौ) वामे[1] वामनभैरवः ।

अपर्णा देवता यत्र ब्रह्मरूपाकरोद्भवा[2] ॥ ४० ॥

श्रीपर्वते दक्षगुल्फ(कर्णौ)स्तत्र[3] श्रीसुन्दरी परा ।

सर्वसिद्धीश्वरी[4] सर्वा सुन्दरानन्दभैरवः[5] ॥ ४१ ॥

कपालिनी (कपाली च) भीमरूपा वामगुल्फो[6] विभाषके ।

[7] [भैरवश्च महादेव सर्वानन्दः शुभप्रदः] ॥ ४२ ॥

AM— पञ्चसागरेते पड़े अधोदन्तसार ।
महारुद्र भैरव वाराही देवी ताँर ॥

Pañcasāgara seems to indicate the oceans, the traditional number of which was, however, four or seven. The reference may also be to the five *Kuṇḍas* near Hardwar.

[1] B—तन्यात् बलि°; G—गुल्फं; I—तल्प ।

AM— करतोयातटे पड़े वामकर्ण ताँर ।
वामेश भैरव देवी अपर्णा ताँहार ॥

AM suggests the reading कर्णं वामे वामेशभैरवः । The Karatoyā is a sacred river of northern Bengal. The Pīṭha is located at Bhavānīpur in the Bogra District. G has a note reading भवानीपुरख्याते ।

[2] A—°करोद्भवः; I—तत्र । The last word of the verse is not quite satisfactory.

[3] ACI—गुल्फं; E—तल्पं; FG—गुल्फं तत्र ।

AM— श्रीपर्वते डानि कर्ण फेलिलेन हरि ।
भैरव सुन्दरानन्द देवता सुन्दरी ॥

AM suggests the reading दक्षकर्णस् तत्र । Śrīparvata is the same as the Śrīśaila in the Nallamalur range to the south of the Krishna. But the non-mention of Mallikārjuna (Śiva) and of Devī Bhramarāmbā on the Śrīśaila shows that the description is probably fantastic. As two other places are associated with Satī's *gulpha* (verses 31 and 42), AM possibly suggests the correct reading of the verse.

[4] ABGI—°सिद्धेश्वरी; E—°सिद्धिकरी ।

[5] CDF—सुनन्दानन्द° ।

[6] C—गुल्फ; DI—गुल्फे; B—गुल्फा; F—गुल्फविभागतः; G—कपालिनी क्रोधरूपा वामगुल्फे विभीषके ।

AM— विभासेते वाम गुल्फ फेलिला केशव ।
भीमरूपा देवी ताहे कपाली भैरव ॥

AM suggests the reading कपाली च भीमरूपा and the omission of the second line of the verse (cf. p. 50, note 7). The Pīṭha is located near Tamluk in the Midnapur District.

[7] This line is omitted in ABE and may be a later interpolation. Cf. p. 50, notes 3 and 7.

उदरश्च (अधरश्च) प्रभासे मे[1] चन्द्रभागा यशस्विनी ।

वक्रतुण्डो भैरव-

श्चोर्द्धोष्ठो भैरवपर्वते[2] ॥ ४३ ॥

अवन्ती[3] च महादेवी लम्बकर्णस्तु भैरवः ॥ ४४ ॥

चिवुके[4] भ्रामरी देवी विकृताक्षो[5] जले स्थले (जनस्थाने)[6] ।

गण्डो गोदावरीतीरे विश्वेशी (विश्वेशो) विश्वमातृका[7] ॥ ४५ ॥

---

[1] A—प्रभाषमे ; BCDE—प्रभाषे ; G—अधरश्च प्रभाषे मे चन्द्राभामा ; I—अधरश्च ।

AM— प्रभासे अधर देवी चन्द्रभागा ताहे ।

वक्रतुण्ड भैरव प्रत्यक्षरूप याहे ॥

AM suggests the reading अधरश्च प्रभासे; of, verse 52 below. Prabhāsa or Somnath is a famous holy place in southern Kathiawar.

[2] B—चोष्ठो भैरवपर्वते ; A—ऊर्द्धोष्ठं भीरुपर्वते ; G—तुण्ड भैरवपर्वते ; I—तुण्डो भैरव° ।

AM— भैरव पर्वते ओष्ठ पड़े चक्रघाय ।

लम्बकर्ण भैरव अवन्ती देवी ताय ॥

AM suggests the reading लम्बकर्णस्तु भैरवः । The Devī's name seems to refer the Pīṭha to West Malwa.

[3] ABCDFI—अवन्त्यां ।

[4] ABC—चिबुके ।

[5] ABFG—विकृताख्या ; I—विकृताख्य ; C—किकुभाख्या ; D—किक्षभाक्षो । Probably विकृताक्षो is intended.

[6] AM— जनस्थाने चिवुक पड़िल अभिराम ।

विकृताक्ष भैरव भ्रामरी देवी नाम ॥

AM suggests the reading विकृताक्षो जनस्थाने । Janasthāna, celebrated in the *Rāmāyaṇa*, lay in the upper Godavari valley in the present Nasik region of the Bombay Presidency. CDF read after this verse: भैरवः सर्वसिद्धोशस्तत्र सिद्धिरनुत्तमा apparently because the reading विकृताख्या invited a name of the Bhairava at the Pīṭha.

[7] I—गण्डे ;

AM— गोदावरी तीरे पड़े वाम गण्डखानि ।

विश्वेश भैरव विश्वमातृका भवानी ॥

AM suggests the reading विश्वेशो विश्वमातृका which shows that verse 46 is probably an interpolation. The reading विश्वेशी necessitated the fabrication of the name of the Bhairava at the Pīṭha. The two lines of verse 46 appear to have been inserted by two different hands. Cf. p. 56, note 8.

[दण्डपाणिर्भैरवस्तु[1] वामगण्डे तु[2] राकिणी ।
[3]भैरवो वत्सनाभस्तु तत्र सिद्धिर्न संशयः[4] ॥ ४६ ॥]
रत्नावल्यां (रत्नवत्यां) दक्षस्कन्धः कुमारी भैरवः शिवः[5] ।
मिथिलायामुमा देवी[6] वामस्कन्धो[7] महोदरः[8] ॥ ४७ ॥
[9] [नलाहाट्यां नलापातो योगीशो[10] भैरवस्तथा ।
तत्र सा कालिका देवी सर्वसिद्धिप्रदायिका[11] ॥ ४८ ॥
[12]कालीघाटे मुण्डपातः क्रोधीशो[13] भैरवस्तथा ।
देवता जयदुर्गाख्या नानाभोगप्रदायिनी ॥ ४९ ॥

---

[1] A—दण्डपाणि ; G—भैरवश्च वामगण्डे च । Rākiṇī is the same as Raṅkiṇī ; cf. *supra*, p. 33 and note 1.

[2] I—च । For the right cheek, see verse 14 (p. 46) above.

[3] D(v.l.)E read in place of this line: अमायो भैरवो वत्स सर्वशैलात्मकोपरि । The reference to Sarvaśaila (literally, all hills) is no doubt fanciful; cf. Pañcasāgara.

[4] B—वत्सनाभश्च तत्र सिद्धिमवाप्नुयात्; GI—वसामि भैरवो वत्स सर्वशैलाख्यगोमिथः (I—°गोविषः) ।

[5] G—रत्नवत्यां दक्षस्कन्धः कुमारी भैरवी शिवा । I—रत्नावल्यां दक्षिणस्कन्धः कुमारी भैरवी शिव ।

AM— रत्नावली स्थाने डानि स्कन्ध अभिराम ।
कुमार भैरव ताहे देवी शिवा नाम ॥

AM suggests the reading कुमारो भैरवो शिवा as in G. A city called Ratnavatī is mentioned in the *Kāvyamīmāṃsā* ; but probably Khanakul-Krishnanagar, on the river Ratnākara (Kānānadī) in the Hooghly District and famous for its temple of Ghaṇṭeśvara Śiva, is indicated. Cf. also the Pramodā *tīrtha* at the confluence of the Vāgmatī and the Ratnāvalī in Nepal.

[6] A—नाम्नी ; CFI—महादेवी ; G—मिथिलायां वामस्कन्धो महादेवी महोदरी ।

AM— मिथिलाय वामस्कन्ध देवी महादेवी ।
महोदर भैरव सर्वार्थ याँरे सेवि ॥

AM supports the reading in G with महोदरः for महोदरी । Mithilā has been identified with Janakpur in the Nepalese Tarai.

[7] ABE—स्कन्दो ; CFI—स्कन्धे ।

[8] D—महोदरे । I reads after this line भैरवो वत्सनाभस्तु तत्र सिद्धिर्न संशयः (*vide* verse 46).

[9] The following eight verses are not found in G (and the AM original) and were apparently interpolated.

[10] EI—योगेशो । The Pīṭha is located at Nalahati in the Birbhum District of West Bengal. The word *nalā* is a Bengali corruption of Sanskrit *nalaka* (any long bone).

[11] B—तत्र सिद्धिर्न संशयः ।

[12] Verse 49 is omitted in I. DEF have in place of this line: कर्णाटे चैव कर्णो (v.l. कर्णं) मे अभीरु(v.l. लभीरु) र्नाम भैरवः । Cf. verse 27 (p. 50) above. This Kālī Pīṭha is located at Juranpur near Katwa in the Burdwan District. The Pīṭha was not mentioned in the original text.

[13] D (v.l.)—क्रोधेशो ; B—क्रोधश्च ।

वक्रेश्वरे मनःपातो वक्रनाथस्तु भैरवः ।[1]
नदी पापहरा तत्र देवी महिषमर्दिनी ॥ ५० ॥
यशोरे पाणिपद्मञ्च देवता यशोरेश्वरी ।
चण्डश्च[2] भैरवो यत्र तत्र सिद्धिर्न संशयः[3] ॥ ५१ ॥
अट्टहासे चोष्ठपातो देवी सा फुल्लरा स्मृता ।
विश्वेशो[4] भैरवस्तत्र सर्वाभीष्टप्रदायकः ॥ ५२ ॥
हारपातो नन्दिपुरे भैरवो नन्दिकेश्वरः ।
नन्दिनी सा महादेवी तत्र सिद्धिमवाप्नुयात्[5] ॥ ५३ ॥
लङ्कायां नूपुरश्चैव भैरवो राक्षसेश्वरः ।[6]
इन्द्राक्षी देवता तत्र इन्द्रेणोपासिता पुरा ॥ ५४ ॥
विराटदेशमध्ये तु[7] पादाङ्गुलिनिपातनम् ।
भैरवश्चामृताख्यश्च[8] देवी तत्राम्बिका स्मृता ॥ ५५ ॥[9]]

---

[1] I—मुण्डपातं । The Pīṭha, which had no mention in the original text, is located near Dubrajpur in the Birbhum District. The *S'ivacarita* separately mentions Vakreśvara and Vakranātha, which, however, appear to be the same place.

[2] A—चण्डस्तु; BF—चण्डश्च भैरवस्तत्र; I—चण्डेशो भैरवो देवस्तत्र ।

[3] I—सिद्धिरवाप्नुयात्; BE—तत्र सिद्धिमवाप्नुयात्; CF—यत्र सिद्धिमवाप्नुयात् । The Yaśora Pīṭha is located at Īśvarīpur (about 25 miles from the Hasanabad Railway Station) in the Khulna District and not actually at Jessore.

[4] C—विघ्नेशो । The Pīṭha, which was not mentioned in the original text, is located near Lābhpur in the Birbhum District.

[5] BCDEFI—सिद्धिर्न संशयः । The Pīṭha is located near Sainthia in the Birbhum District.

[6] I—नन्दिकेश्वरः । The name of the Bhairava suggests that this Laṅkā is identical with Ceylon, although the author may have had no knowledge of the Ceylonese *tīrthas*. Laṅkā (literally, an island) was not referred to in the original text.

[7] A—विराट मध्यदेशे तु; I—°निपातनः । The ancient Virāṭa or Matsya country lay in the Jaipur-Alwar-Bharatpur region of Rajputana; but late medieval writers often placed a Virāṭa country in northern Bengal (cf. *I.C.*, VIII, pp. 53-54). This Pīṭha had no place in the original text.

[8] AE—अमृताक्षस्य ; I—भैरवोऽमृताख्यस्य ।

[9] D (v.l.) EF add after this verse:

मगधे (v.l. मागधे) दक्षजङ्घा मे व्योमकेशस्तु भैरवः ।
सर्वानन्दमयी (v.l. °करी) देवी सर्वकाम(v.l. सर्वानन्द)फलप्रदा ॥

This verse was fabricated by one who could not find out all the 51 Pīṭhas owing to errors in the manuscripts consulted; cf. the case of Karṇāta (p. 56, note 12).

एतास्ते कथिताः पुत्र पीठनाथाधिदेवताः[1] ।
क्षेत्राधिपं[2] विना देव पूजयेत् पीठदेवताम्[3] ।
भैरवैर्ह्रियते सर्वं जपपूजादिसाधनम्[4] ॥ ५६ ॥
अज्ञात्वा भैरवं पीठे पीठशक्तिञ्च शङ्कर[5] ।
प्राणनाथ न सिध्येत्तु[6] कल्पकोटिजपादिभिः ॥ ५७ ॥
न देयं परशिष्याय[7] निन्दकाय दुरात्मने ।
शठाय क्रूरकार्याय[8] दत्वा मृत्युमवाप्नुयात् ।
दद्याच्छान्ताय[9] शिष्याय मन्त्री मन्त्रार्थसिद्धये ॥ ५८ ॥[10]

---

1 A—पीठनाथादि°; G—एतत्ते कथितं वत्स पीठनाथादि°; I—एतत्ते कथित ।

2 D—क्षेत्राधीशं; G—क्षेत्राधीशं विना यस्तु; I—क्षेत्राधीशं विना देवि ।

3 CDF—पूजयेच्चान्य° ।

4 G—जपपूजादिकं धनम्; I—भैरवे हृदयः सर्वं ।

5 BCDE—पीठ; A—भैरवपीठं; G—पीठं पीठशक्ति; I—अज्ञत्वा भैरवं पीठं ।

6 A—सिध्यन्ति; B—सिद्धे तु; CEG—सिध्येत; I—सिद्धेत ।

7 A—°शिष्येभ्यो; I—देया ।

8 B—क्रूरकर्माय; EG—वञ्चकायेदं; I—वञ्चकायेत्थं ।

9 A—दयात् शान्ताय शिष्टाय;
EI—दद्यात् शान्ताय शिष्याय नैष्ठिकाय शुचौ प्रिये (I—धिरे) ।
साधकाय कुलीनाय मन्त्री मन्त्रार्थसिद्धये ॥

G supports the reading of E with शिष्याय शान्ताय for शान्ताय शिष्याय and शुचि for शुचौ
Here is an attempt to make a complete verse in the *anuṣṭubh* out of a half verse. Similar cases are also noticed elsewhere in the text. Cf. pp. 44, note 3; 45, note 5, etc.

10 Colophon: A—इति तन्त्रचूडामणौ पार्वतीशिवसंवादे एकपञ्चाशद्विद्योत्पत्तौ पीठनिर्णयः समाप्तः; B—इति तन्त्रचूडामणौ शिवपार्वतीसंवादे महापीठनिरूपणं समाप्तं; C—goes on to quote some verses of the *Mahānīlatantra*; E—इति तन्त्रचूडामणौ शिवपार्वतीसंवादे एकपञ्चाशद् विद्योत्पत्तौ पीठनिर्णयः समाप्तः । G—इति चन्द्रचूडामणितन्त्रे (cf. p. 42, note 2 पार्वतीशिवसंवादे विद्योत्पत्तौ पीठनिर्णयः समाप्तः । श्रीदुर्गा । श्रीरमानाथशर्मणः पुस्तकमिदम् । H—इति श्रीभावचूडामणौ षट्कर्मसाधनविधौ पीठनिर्णयः पटलः । I—इति तन्त्रचूडामणौ विद्यत्पत्तौ (विद्यो°) पीठनिर्णयं समाप्तं ॥ ॐ नमः परमदेवतायै । शुभमस्तु शकाब्दाः १७।६० (१७६०) सन १२।४५ (१२४५) साल तारिख १४ भाद्रस्य श्रीकालीनाथदेवशर्मणः स्वाक्षरं पुस्तकञ्च ॥ श्रीश्रीविश्वेश्वराय नमः । श्रीश्रीदुर्गा ।

Cf. AM— एकमत ना हय पुराण मत यत ।
आमि कहि मन्त्रचूडामणि तन्त्र मत ॥

It has been noted above that the *Tripurā Rājamālā* says about a verse of our text: शिववाक्य पीठमाला तन्त्रेर प्रमाण । See p. 4, note 1. Note also that Bhāratacandra was aware of the differences of opinion about the Pīṭhas.

APPENDIX I

A

Probable Original Text of the Pīṭhanirṇaya (Mahāpīṭha-nirūpaṇa) Reconstructed on the Basis of Manuscript G and the Annadāmaṅgala.

ईश्वर उवाच ।

मातः परात्परे देवि सर्वज्ञानमयीश्वरि ।
कथ्यतां मे सर्वपीठशक्तिभैरवदेवताः ॥ १ ॥

देव्युवाच ।

शृणु वत्स प्रवक्ष्यामि दयाल भक्तवत्सल ।
याभिर्विना न सिध्यन्ति जपसाधनसत्क्रियाः ॥ २ ॥
पञ्चाशदेकपीठानि एवं भैरवदेवताः ।
अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च ॥ ३ ॥
ममाद्यवपुषो देव हिताय त्वयि कथ्यते ।
ब्रह्मरन्ध्रं हिङ्गुलायां [1] भैरवो भीमलोचनः ॥ ४ ॥
कोट्टरी सा महादेवी त्रिगुणा या दिगम्बरी ।
शर्करारे [2] त्रिनेत्रं मे देवी महिषमर्दिनी ॥ ५ ॥
क्रोधीशो भैरवस्तत्र
सुगन्धायाञ्च [3] नासिका ।
देवस्त्र्यम्बकनामा च सुनन्दा तत्र देवता ॥ ६ ॥
काश्मीरे [4] कण्ठदेशश्च त्रिसन्ध्येश्वरभैरवः ।
महामाया भगवती गुणातीता वरप्रदा ॥ ७ ॥
ज्वालामुख्यां [5] तथा जिह्वा देव उन्मत्तभैरवः ।
अम्बिका सिद्धिदा देवी
स्तनं जालन्धरे [6] मम ॥ ८ ॥
भीषणो भैरवस्तत्र देवी त्रिपुरनाशिनी ।
हार्दपीठं वैद्यनाथे [7] वैद्यनाथस्तु भैरवः ॥ ९ ॥
देवता जयदुर्गाख्या
नेपाले [8] जानु मे शिव ।
कपाली भैरवः श्रीमान् महामाया च देवता ॥ १० ॥
मानसे [9] दक्षहस्तो मे देवी दाक्षायणी हरः ।
विरजा चोत्कले [10] ख्याता नाभिर्मे जयभैरवः ॥ ११ ॥
गण्डक्यां [11] गण्डकश्चण्डी जगन्नाथस्तु भैरवः ।
बहुलायां [12] वामबाहुर्बहुलाख्या च देवता ॥ १२ ॥

भीरुको भैरवस्तत्र सर्वसिद्धिप्रदायकः ।
उज्जयिन्यां [13] कूर्परश्च मङ्गला कपिलाम्बरः ॥ १३ ॥
चट्टले [14] दक्षबाहुर्मे भैरवश्चन्द्रशेखरः ।
व्यक्तरूपा भगवती भवानी तत्र देवता ॥ १४ ॥
विशेषतः कलियुगे वसामि चन्द्रशेखरे ।
त्रिपुरायां [15] दक्षपादो देवता त्रिपुरा नलः ॥ १५ ॥
त्रिस्रोतायां [16] वामपादो भ्रामरी भैरवोम्बरः ।
योनिपीठं कामरूपे [17-26] कामाख्या तत्र देवता ॥ १६ ॥
यत्रास्ते त्रिगुणातीता व्यक्ता पाषाणरूपिणी ।
यत्रास्ते माधवः साक्षाच्छिवानन्दोऽथ भैरवः ॥ १७ ॥
तत्र श्रीभैरवी देवी तत्र च क्षेत्रदेवता ।
प्रचण्डचण्डिका तत्र मातङ्गी त्रिपुराम्बिका ॥ १८ ॥
बगला कमला तत्र भुवनेशी सधूमिनी ।
एतानि दशपीठानि शंसन्ति दशभैरवाः ॥ १९ ॥
क्षीरग्रामे [27] महादेव भैरवः क्षीरकण्ठकः ।
युगाद्या सा महामाया दक्षाङ्गुष्ठं पदो मम ॥ २० ॥
नकुलीशः कालीपीठे [28] दक्षपादाङ्गुलीषु मे ।
अङ्गुलीषु च हस्तस्य प्रयागे [29] ललिता भवः ॥ २१ ॥
जयन्त्यां [30] वामजङ्घा च जयन्ती क्रमदीश्वरः ।
भुवनेशी सिद्धिरूपः किरीटाख्ये [31] किरीटकः ॥ २२ ॥
कन्याश्रमे [32] च पृष्ठं मे निमिषो भैरवस्तथा ।
सर्वाणी देवता तत्र
कुरुक्षेत्रे [33] च गुल्फतः ॥ २३ ॥
स्थाणुर्नाम्ना च सावित्री देवता
मणिवेदके [34] ।
मणिबन्धे च गायत्री सर्वानन्दस्तु भैरवः ॥ २४ ॥
श्रीहट्टे [35] च मम ग्रीवा महालक्ष्मीस्तु देवता ।
भैरवः सम्बरानन्दो देशे देशे व्यवस्थितः ॥ २५ ॥
काञ्चीदेशे [36] च कङ्कालो भैरवो रुरुनामकः ।
देवता देवगर्भाख्या
नितम्बः कालमाधवे [37] ॥ २६ ॥
भैरवोऽत्रासिताङ्गश्च देवी काली सुसिद्धिदा ।
दृष्ट्वा दृष्ट्वा नमस्कृत्य मन्त्रसिद्धिमवाप्नुयात् ॥ २७ ॥

शोणाख्या भद्रसेनस्तु नर्मदाख्ये [३८] नितम्बकः ।
रामगिरौ [३९] स्तनान्यश्च शिवानी चण्डभैरवः ॥ २८ ॥
उमावने [४०] केशजालं भूतेशः परभैरवः ।
संहाराख्य ऊर्द्धदन्तेऽनले [४१] नारायणी शुचौ ॥ २९ ॥
अधोदन्ते महारुद्रो वाराही पञ्चसागरे [४२] ।
करतोयातटे [४३] कर्णे वामे वामनभैरवः ॥ ३० ॥
अपर्णा देवता तत्र ब्रह्मरूपाकरोद्भवा ।
श्रीपर्वते [४४] दक्षकर्णस्तत्र श्रीसुन्दरी परा ॥ ३१ ॥
सर्वसिद्धीश्वरी देवी सुन्दरानन्दभैरवः ।
कपाली च भीमरूपा वामगुल्फो विभाषके [४५] ॥ ३२ ॥
अधरश्च प्रभासे [४६] मे चन्द्रभागा यशस्विनी ।
वक्रतुण्डो भैरवश्च
ओष्ठो भैरवपर्वते [४७] ॥ ३३ ॥
अवन्ती च महादेवी लम्बकर्णस्तु भैरवः ।
चिवुके भ्रामरी देवी विकृताख्यो जनस्थाने [४८] ॥ ३४ ॥
गण्डो गोदावरीतीरे [४९] विश्वेशो विश्वमातृका ।
रत्नवत्यां [५०] दक्षस्कन्धः कुमारी भैरवी शिवा ॥ ३५ ॥
मिथिलायां [५१] महादेवी वामस्कन्धो महोदरः ।
एतास्ते कथिताः पुत्र पीठनाथाधिदेवताः ॥ ३६ ॥
क्षेत्राधीशं विना देव पूजयेत्पीठदेवताम् ।
भैरवैर्क्रियते सर्वं जपपूजादिसाधनम् ॥ ३७ ॥
अज्ञात्वा भैरवं पीठे पीठशक्तिश्च शङ्कर ।
प्राणनाथ न सिध्येत्तु कल्पकोटिजपादिभिः ॥ ३८ ॥
न देयं परशिष्याय निन्दकाय दुरात्मने ।
शठाय क्रूरकार्याय दत्वा मृत्युमवाप्नुयात् ॥ ३९ ॥
दद्याच्छान्ताय शिष्याय मन्त्री मन्त्रार्थसिद्धये ॥ ४० ॥

B

Modified Text of the Pīṭhanirṇaya as found in Manuscript H (with slight emendation of the faulty language of the original).

श्रीशिव उवाच ।
षट्कर्मसाधनं देवि कस्मिन् स्थाने प्रशस्तकम् ।
मातः परावरे नित्ये सर्वज्ञानमहेश्वरि ॥
कथ्यतां मे सर्वपीठं तथा षट्कर्मसाधनम् ।
शक्तिभैरवदेव्यश्च साधूनां हितकाम्यया ॥

श्रीदेव्युवाच ।

शृणु वत्स प्रवक्ष्यामि दयाल भक्तवत्सल ।
यानि विना न सिध्यन्ति जपसाधनसत्क्रियाः ॥
पञ्चाशदेकपीठानि चैवं भैरवदेवताः ।
प्रधानं पीठकं देव यथा भैरवदेवताः ॥
यत्र साधनं प्रशस्तं तथा षट्कर्म भैरव ॥
गङ्गाद्याः सततं सर्वाः समुद्राश्च तथा नदाः ।
सर्वतीर्थानि सर्वत्र ममाङ्गे शृणु भैरव ॥
अङ्गप्रत्यङ्गपातेन विष्णुचक्रक्षतेन च ।
ममास्य वपुषो देव हिताय च नृणां शृणु ॥
ब्रह्मरन्ध्रं हिङ्गुलायां भैरवो भीमलोचनः ।
कुट्टवी सा महाकाली त्रिगुणा या दिगम्बरी ॥
शर्कर्य्यां दक्षनेत्रं मे देवी महिषमर्दिनी ।
क्रोधीशो भैरवस्तत्र सुगन्धनामकाननः ॥
ताराद्यायां वामनेत्रं ताराख्या तारिणी परा ।
उन्मत्तो भैरवस्तत्र सर्वलक्षणसंयुतः ॥
मानसे दक्षहस्तो मे तत्र दाक्षायणी हरः ॥
विजये उत्कले ख्याते नाभिर्मे अम्बभैरवः ।
सोऽयञ्च सिद्धिदः साक्षाद् देवी मङ्गलचण्डिका ॥
सदने दक्षकूर्पं(?) मे भैरवश्चण्डसंज्ञकः ।
व्यक्तरूपा भगवती भवानी यत्र देवता ॥
सुगन्ध (?) नासिका यत्र देवस्त्र्यम्बकभैरवः ।
आनन्दा देवता तत्र सर्वसिद्धिप्रदायिनी ॥
काश्मीरे कण्ठदेशश्च त्रिसन्ध्येश्वरभैरवः ।
महामाया भगवती गुणातीता वरप्रदा ॥
ज्वालामुख्यां तथा जिह्वा भैरवो वटकेश्वरः ।
अम्बिका सिद्धिदा नाम्नी स्तने जालन्धरे मम ॥
भीषणो भैरवस्तत्र देवी त्रिपुरमालिनी ॥
वामस्तनं वक्रेश्वरे भैरवश्चन्द्रशेखरः ।
देवता भैरवी तत्र सर्वपीठेषु नायिका ॥
नासा मे नवखण्डे च वैद्यनाथश्च भैरवः ।
देवता दुर्गाख्या च सा सर्वसिद्धिप्रदायिनी ॥
नेपाले जयदुर्गाख्या तत्र वै तालुकं शिव ।
कपाली भैरवस्तत्र महामारी च देवता ॥

विशेषतः कलियुगे वसामि चन्द्रशेखरे ॥
त्रिपुरायां दक्षपादो देवी त्रिपुरसुन्दरी ।
भैरवस्त्रिपुरो देवः सर्वसम्पत्प्रदायकः ॥
त्रिस्रोतायां वामपादो देवता भ्रामरी स्वयम् ।
योनिपीठं कामगिरौ कामाख्या देवता स्वयम् ॥
यत्रास्ते त्रिगुणात्मिका व्यक्तपाषाणरूपिणी ।
यत्र श्रीभैरवी देवी यत्र नक्षत्रदेवता ॥
प्रचण्डचण्डिका चैव मातङ्गी त्रिपुरात्मिका ।
बगला कमला तत्र भवानी हरनायिका ॥
महाकाली स्वयं तत्र भद्रकाली तथापरा ।
सर्वशक्तिः स्वयं तत्र सर्वभैरवदेवताः ॥
महाकालः स्वयं तत्र सर्वदेवसमन्वितः ।
सर्वत्र विरला चाहं कामरूपे गृहे गृहे ॥
एतानि वरपीठानि प्रशंसन्ति च भैरवाः ।
एषां ते देवताः सर्वास्तथा क्षेत्राधिदेवताः ॥
अङ्गुलीषु च सर्वेषु प्रयागे ललिता स्वयम् ॥
कुरुक्षेत्रे तथा देवा भैरवाः पुण्यभाजनाः ।
क्षेत्रेशी देवता तत्र सर्वपापविनाशिनी ॥
विन्ध्यशेखरमासाद्य पतिता चाङ्गुली मम ।
सर्वेशो भैरवो नामा तत्र तिष्ठति नित्यशः ॥
जयन्त्यां वामजङ्घा मे जयन्ती कुमुदेश्वरी ।
कोँकि कोँकेश्वरी देवी भैरवो रुरुनामकः ॥
मेखले[1] मेखली देवी वामाङ्गुली प्रभेदतः ।
[तत्र च भैरवस्खण्डनामकः स महाबलः] ॥
गौरीशिखरमारुह्य पुनर्जन्म न विद्यते ।
तत्राहं भवता सार्द्धं वसामि नियतं शिव ॥
भूतधात्री महादेवी भैरवः क्षीरखण्डभाक् ।
युगाद्या सा महाविद्या विख्याता भुवनत्रये ॥
नकुलीशः कालीघाटे कालिका तत्र देवता ।
तत्र मे पतिता वत्स केशा मस्तकसंयुताः ॥

[1] It is tempting to suggest the emendation मेकले referring to the old Mekala country about the Amarkantak hills. But the author may have actually had in his mind Mekhliganj in the Coch Bihar State in North Bengal. Cf. Mekhalā of the Rudrayāmala list quoted above (p. 18).

करतोयां समारभ्य यावद्दिक्करवासिनीम् ।
शतयोजनविस्तीर्णं योनिचक्रं महेश्वर ।
देवा मरणमिच्छन्ति किं पुनर्मानुषादयः ॥
भुवनेशी सिद्धिरूपा किरीटाख्यायां किरीटिका ।
देवेशो भैरवस्तत्र सर्वमङ्गलदायकः ॥
फुल्लरायामाभरणं देवता विमला च वै ।
संवर्त्तो भैरवो देव सर्वदेवनमस्कृतः ॥
वाराणस्यां विशालाक्षी देवता कालभैरवः ।
तत्र मे पतितं लिङ्गं (?) स्वयमेव सदाशिव ॥
मणिकर्णिकेति विख्याता कुण्डले च मम श्रुतेः ॥
अयोध्यायाञ्च मे हारो भैरवो हरिहरात्मकः ।
तत्र सा देवता पूर्णा महालक्ष्मीः सुखप्रदा ॥
कल्पास्तु मे (कन्याश्रमे ?) कात्यायनी वामदेवस्य भैरवः ।
तत्र मे पतितं चर्म नमौषो नाम एव च ॥
कुमारी देवता तत्र सर्वाणः सर्व भैरवः ।
तत्र मे पतितं रोम तस्माद् भैरवदेवता ॥
स्थाननामा च सावित्री देवता मणिवेदका (°वेदके ?) ।
मणिबन्धे च गायत्री सर्वानन्दस्य भैरवः ॥
श्रीशैले च मम ग्रीवा महालक्ष्मीस्य देवता ।
भैरवः संभ्टतानन्दो देशे देशे व्यवस्थितः ॥
काञ्चीदेशे च कङ्काली भैरवो मदनः स्वयम् ।
तत्र मे पतिते देव नितम्बे देववल्लभ ॥
देवता वेदगर्भाख्या माधवो भैरवः स्वयम् ।
तत्र मे पतिता विद्या तथा च कालमाधवे ॥
भैरवः शुङ्कनामा च देवी काली सुसिद्धिदा ।
मणिद्वीपे महाबाहो पतितं मे सुवस्त्रकम् ।
दृष्ट्वा स्तुत्वा महादेव मन्त्रसिद्धिमवाप्नुयात् ॥
कुजवारे भूततिथौ निशार्द्धे यस्तु साधकः ।
नत्वा प्रदक्षिणीकृत्य मन्त्रसिद्धिमवाप्नुयात् ॥
सोमाख्ये भद्रसेनस्य तत्र भद्रा च देवता ।
वामपार्श्वे शुभाख्या च नर्त्तकी दण्डभैरवः ॥
उमानाम्नी केशपाशे भूतेशः पूर्णभैरवः ।
संहाराख्ये चोर्द्धदन्तो देवी नारायणी शुचौ ॥

अधोदन्तो महारुद्र वाराही सप्तसागरः (°सागरे ?)[1] ॥
करतोयातटे शय्या तत्र वामनभैरवः ।
अपर्णा देवता तत्र सर्वेशो भैरवः स्वयम् ॥
श्रीपर्वते नूपुरश्च सुन्दरी तत्र देवता ।
सुन्दरो भैरवो देव योगिनीवल्लभप्रभुः ॥
सिद्धेश्वरी महाविद्या समुद्रो भैरवः स्वयम् ।
दन्तावलीषु मे देव जाता भैरवदेवताः ॥
प्रभासे धर्मकं देव तत्र कपालिनी परा ।
भैरवः सर्वदेवश्च सर्वभैरवनायकः ॥
गोदावरीमहातीर्थे हरिद्वारे च विभ्यसे ।
वक्रेशो भैरवस्तत्र भैरवी देवता स्वयम् ॥
ओष्ठं वैवस्वते तीर्थे हरिता त्रिपुटा तथा ।
भैरवः सोमहन्ता च सर्वदेवी तथापरा ॥
चिबुके डामरी (भ्रामरी) देवी विकटाख्या जले स्थले ।
गण्डे गर्गा सुपर्वा च विश्वेशो विश्वमातृका ।
दण्डपाणिभैरवश्च वामगण्डे च राकिणी ॥
शैलखण्डस्थखण्डे मे सर्वभौतिकदेवताः ।
रत्नावल्यां स्कन्धदेशः कुमारो भैरवः स्वयम् ॥
देवता च शिवा देवी भैरवश्च स्वयं शिवः ॥
मिथिलायां वामदेशे उग्रदेवी महोदरी ।
सेतुबन्धे महाभीमो भैरवो देवता जया ।
लोमखण्डे च देवेशस्तैलाङ्गे (तैलङ्गे ?) चण्डनायिका ॥
चण्डेशो भैरवस्तत्र नित्यं तत्र वसाम्यहम् ॥
भैरवो दीर्घदंशौ च चक्रपाणिश्च भैरवः ।
क्षेत्रवती महादेवी सर्वसम्पत्प्रदायिनी ॥
पृथिव्यां यानि तीर्थानि याश्च भैरवदेवताः ।
पर्वतेषु श्मशानेषु गङ्गासागरसङ्गमे ॥
वैष्णवी सा महादेवी माधवो भैरवः स्वयम् ।
महाकायो महायोगो भैरवः सर्वविघ्नकृत् (°हृत्) ॥
कलौ नीलाचलक्षेत्रं तथा च भुवनेश्वरः ।
विमला विरजा भद्रा जगन्नाथश्च भैरवः ॥
तत्र मे पतितं देव उच्छिष्टं शुद्धिता तथा ।
भुवनेशो भैरवस्तत्र वसामि च द्वया सदा (त्वया सह ?) ॥

[1] Note the attempt to correct पश्च into सप्त. See *supra*, p. 53, note 9.

उच्छिष्टचण्डालिनी देवी सर्वपीठेश्वरी परा ॥
चक्रद्वीपे शूलपाणिर्देवता चक्रधारिणी ।
तत्र मे पतितश्चास्त्रं तेन जातो महोरगः ॥
एतत्ते कथितं देव पीठनाथादिदैवतम् ॥
क्षेत्राधीशं विना देव पूजयेत् पीठदेवताम् ।
भैरवीरहितं सर्वं जपसाधनकं क्रियाः (?) ॥
अज्ञात्वा भैरवं पीठं शक्तिञ्च कुलभैरवम् ।
प्राणनाथ न सिध्यन्ति कल्पकोटिजपादिभिः ॥
न देयं परशिष्याय निन्दिताय दुरात्मने ।
शठाय वञ्चकायास्तु दत्वा मृत्युमवाप्नुयात् ॥
देयं शिष्याय शान्ताय नैष्ठिकाय ममाज्ञया ।
एषु स्थानेषु देवेश षट्कर्मसाधनं चरेत् ॥
साधकाय कुलीनाय मन्त्री मन्त्रार्थसिद्धये ।
दद्याच्चैव महादेव अन्यथा पतनं भवेत् ॥

APPENDIX II

Puranic Text containing 108 Names of the Mother-goddess.

नामाष्टोत्तरशतम्

Mts = Matsya Purāṇa: *a* Veṅkaṭeśvara Press ed.; *b* Ānandāśrama ed.; *c* Vaṅgavāsī ed. (ch. 13, verses 26–53).
DBh = Devībhāgavata, Vaṅgavāsī ed. (Bk. VII, ch. 30, verses 55–83).
Pdm = Padma Purāṇa-Sṛṣṭikhaṇḍa, Vaṅgavāsī ed. (ch. 17, verses 184–211).
Skd = Skanda Purāṇa-Āvantyakhaṇḍa, Vaṅgavāsī ed. (Revākhaṇḍa, ch. 98, verses 64–92).

[1] वाराणस्यां विशालाक्षी नैमिषे लिङ्गधारिणी [2] ।

---

[1] Pdm begins the section with the additional line: सावित्री पुष्करे नाम तीर्थानां प्रवरे शुभे and reads कर्णिके for पुष्करे in verse 4.

It is interesting to note that a number of the holy places mentioned here are also known from the *Viṣṇusaṃhitā* (ch. 85) as *tīrthas* suitable for performing funerary rites. The list of 54 in the *Viṣṇusaṃhitā* includes: Puṣkara, Gayāśīrṣa, Akṣayavaṭa, Amarakaṇṭaka, Varāhaparvata, Narmadātīra, Yamunātīra, Gaṅgā, Kuśāvarta, Binduka, Nīlaparvata, Kanakhala, Kubjāmra, Bhṛgutuṅga, Kedāra, Mahālaya, Naḍantikā, Sugandhā, Śākambharī, Phalgutīrtha, Mahāgaṅgā, Trihalikāgrāma, Kumāradhārā, Prabhāsa, Sarasvatī, Gaṅgādvāra, Prayāga, Gaṅgāsāgarasaṅgama, Naimiṣāraṇya, Vārāṇasī, Agastyāśrama, Kaṇvāśrama, Kauśikī, Sarayūtīra, Śoṇajyotiṣāsaṅgama, Śrīparvata, Kālodaka, Uttaramānasa, Vaḍavā, Mataṅgavāpī, Saptārṣa, Viṣṇupada, Svargamārgapada, Godāvarī, Gomatī, Vetravatī, Vipāśā, Vitastā, Śatadrutīra, Candrabhāgā, Irāvatī, Sindhutīra, Dakṣiṇa-Pañcanada and Ausaja. Cf. the *Prāṇatoṣaṇī* lists quoted above, pp. 25, note 3; 28, note 2. Note also the long list of *Pitṛtīrthas* or *Śrāddhatīrthas* in the *Padma Purāṇa*, Sṛṣṭikhaṇḍa, ch. 11. For an important but later list of Śākta *tīrthas*, see *DBh*, VII, 38, 5–30.

[2] DBh—गौरीमुखनिवासिनी ।

क्षेत्रे वै नैमिषारण्ये प्रोक्ता सा लिङ्गधारिणी ॥

The elaboration (cf. p. 58, note 9) points to later modification of the original text.

प्रयागे ललिता देवी [1] कामाक्षी [2] गन्धमादने ॥ १ ॥
मानसे कुमुदा नाम विश्वकाया तथाम्बरे [3] ।
गोमन्ते गोमती नाम मन्दरे कामचारिणी ॥ २ ॥
मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे [4] ।
कान्यकुब्जे तथा गौरी रम्भा मलयपर्वते [5] ॥ ३ ॥
एकाम्रके [6] कीर्त्तिमती विश्वां [7] विश्वेश्वरे [8] विदुः ।
पुष्करे पुरुहूतेति केदारे मार्गदायिनी [9] ॥ ४ ॥
नन्दा [10] हिमवतः पृष्ठे गोकर्णे भद्रकर्णिका [11] ।
स्थाण्वीश्वरे [12] भवानी तु विल्वके [13] विल्वपत्रिका ॥ ५ ॥
श्रीशैले माधवी नाम [14] भद्रा भद्रेश्वरे [15] तथा ।
जया वराहशैले तु [16] कमला कमलालये ॥ ६ ॥
रुद्रकोट्याञ्च [17] रुद्राणी काली कालञ्जरे गिरौ [18] ।
[19] महालिङ्गे तु कपिला मर्कोटे [20] मुकुटेश्वरी ॥ ७ ॥

---

1 DBh—प्रोक्ता ।

2 DBh—कामुकी ; Pdm, Skd—कामुका ।

3 Skd—°परे ; DBh—प्रोक्ता दक्षिणे चोत्तरे तथा ।
विश्वकामा भगवती विश्वकामप्रपूरिणी ॥ (Cf. p. 66, note 2.)

4 Skd—ह्यन्ती ह्यास्तिने पुरे ।

5 DBh—गौरी प्रोक्ता कान्यकुब्जे रम्भा तु मलयाचले ।

6 Mts *ab*—एकाम्भके ; DBh—एकाम्रपीठे सम्प्रोक्ता देवी सा कीर्त्तिमत्यपि ।
विश्वे विश्वेश्वरीं प्राहुः पुरुहूताञ्च पुष्करे ।
केदारपीठे सम्प्रोक्ता देवी सन्मार्गदायिनी ॥ (Cf. note 3 above ; also p. 66, note 2.)

7 Pdm—विल्वा ।

8 Pdm (v.l.)—विश्वेश्वरी ।

9 Pdm—कर्णिके पूरुहस्तेति केदारे मार्गदायिका । Skd—पुरुहूता च ।

10 DBh—मन्दा ; Skd—हिमवतः प्रस्थे ।

11 Pdm—भद्रकालिका ।

12 Mts, DBh, Skd—स्थानेश्वरे ।

13 Mts *ab*—विल्वले. Cf. विन्दुक in the *Viṣṇusaṃhitā*.

14 Pdm—देवी ; DBh—प्रोक्ता ।

15 Mts *c*—भद्रेश्वरे ; Skd—भद्रे भद्रेश्वरीति च ।

16 DBh—वराहशैले तु जया ।

17 Pdm—रुद्रकोट्यान्तु ; DBh—रुद्राणी रुद्रकोट्यान्तु ; Skd—रुद्रकोट्यान्तु कल्याणी ।

18 Skd, Pdm, Dbh—तथा ।

19 DBh reads this line after the following line.

20 Skd, DBh—माकोट ; Pdm—कर्कोटे मङ्गलेश्वरी ।

शालग्रामे[1] महादेवी शिवलिङ्गे जलप्रिया ।
मायापुर्यां कुमारी तु सन्ताने ललिता तथा ॥ ८ ॥
[2]उत्पलाक्षी[3] सहस्राक्षे कमलाक्षे[4] महोत्पला ।
गङ्गायां[5] मङ्गला नाम[6] विमला पुरुषोत्तमे ॥ ९ ॥
विपाशायाममोघाक्षी पाटला पुण्ड्रवर्द्धने[7] ।
नारायणी सुपार्श्वे तु त्रिकूटे[8] भद्रसुन्दरी[9] ॥ १० ॥
विपुले विपुला नाम[10] कल्याणी मानसाचले[11] ।
कोटवी कोटितीर्थे तु[12] सुगन्धा माधवे वने[13] ॥ ११ ॥
गोदाश्रमे[14] त्रिसन्ध्या तु गङ्गाद्वारे रतिप्रिया[15] ।
शिवकुण्डे[16] शिवानन्दा[17] नन्दिनी देविकातटे ॥ १२ ॥
रुक्मिणी द्वारवत्यान्तु राधा वृन्दावने वने[18] ।
देवकी मथुरायान्तु पाताले परमेश्वरी ॥ १३ ॥
चित्रकूटे तथा सीता विन्ध्ये विन्ध्यनिवासिनी[19] ।
[20]सह्याद्रावेकवीरा तु हरिश्चन्द्रे[21] तु चन्द्रिका ॥ १४ ॥

---

1 Skd—शालिग्रामे ।

2 DBh reads this line after the following line.

3 Pdm—उत्पलाख्या ।

4 Skd, Pdm, DBh—हिरण्याक्षे ।

Cf. गोवर्धनं हरिश्चन्द्रं पुरश्चन्द्रं पृथूदकम् ।
सहस्राक्षं हिरण्याक्षं तथा च कदली नदी ॥ पद्मपुराण । सृष्टिखण्ड । ११ । ४२ ।

5 Pdm, DBh—गयायां ; Skd—गयायां विमला नाम मङ्गला पुरुषोत्तमे ।

6 DBh—प्रोक्ता ।

7 Pdm—पुण्यवर्द्धने । The accounts of Hiuen Tsang appear to support this form of the name.

8 Mts—त्रिकूटे ।

9 DBh—रुद्र° ।

10 DBh—देवी ।

11 Skd, Mts, DBh—मलयाचले । After this line DBh reads the last line of verse 14 and the first of verse 15.

12 Skd—°तीर्थेषु ।

13 Pdm—माधवी° ; Skd—गन्धमादने (cf. verse 1). Cf. सुगन्धा in the *V.S.*

14 Pdm—गोदावर्यां ; Mts *a* (v.l.)—कुब्जाम्रके. Cf. कुब्जाम्र in the *V.S.*

15 Pdm—हरिप्रिया ।

16 DBh—शिवकुञ्जे ; Skd—शिवचण्डे ।

17 Mts *a* (v.l.)—सुनन्दा तु ; *b* (v.l.), DBh—शुभानन्दा ; Skd—सभानन्दा ।

18 Pdm—तथा ।

19 Mts—विन्ध्याधिवासिनी ।

20 DBh reads this line after the following one.

21 Mts *a* (v.l.)—हर्मचन्द्रे ; Skd—चण्डिका । For the name हरिश्चन्द्र, see *Padma Purāṇa*, Sṛṣṭikhaṇḍa, ch. 11, v. 42 quoted in note 4 above.

रमणा रामतीर्थे तु यमुनायां मृगावती ।
करवीरे महालक्ष्मीरुमादेवी [1] विनायके ॥ १५ ॥
आरोगा [2] वैद्यनाथे तु महाकाले महेश्वरी ।
अभयेत्युष्णतीर्थे तु [3] चामृता विन्ध्यकन्दरे ॥ १६ ॥
माण्डव्ये [4] माण्डवी नाम स्वाहा माहेश्वरे [5] पुरे ।
छागलाण्डे [6] प्रचण्डा तु चण्डिकामरकण्टके [7] ॥ १७ ॥
सोमेश्वरे वरारोहा प्रभासे पुष्करावती ।
देवमाता [8] सरस्वत्यां पारावारतटे माता [9] ॥ १८ ॥
महालये महाभागा [10] पयोष्ण्यां पिङ्गलेश्वरी ।
सिंहिका कृतशौचे तु कार्त्तिकेये यशस्करी [11] ॥ १९ ॥
उत्पलावर्त्तके लोला सुभद्रा शोणसङ्गमे [12] ।
माता सिद्धपुरे [13] लक्ष्मीरङ्गना [14] भरताश्रमे ॥ २० ॥
जालन्धरे विश्वमुखी तारा किष्किन्ध्यपर्वते [15] ।
देवदारुवने पुष्टिर्मेधा काश्मीरमण्डले ॥ २१ ॥
भीमादेवी हिमाद्रौ तु [16] तुष्टिर्वस्त्रेश्वरे [17] तथा ।
कपालमोचने शुद्धिर्माता [18] कायावरोहणे ॥ २२ ॥

---

1 Skd—रूपादेवी ।
2 Mts *b* (v.l.), DBh, Skd—आरोग्या ।
3 Skd—°तीर्थे तु मृगी वा ; Pdm—पुष्पतीर्थेतु अमृता ; DBh—नितम्बा विन्ध्य° ।
4 DBh—माण्डवे ; Skd—माण्डुकीनाम ।
5 Skd—महेश्वरे ; DBh—माहेश्वरी° ।
6 DBh—छगलण्डे ; Skd—छागलिङ्गे ; Pdm—वेगले तु प्रचण्डाथ ।
7 Mts—मकरन्दके ; *b* (v.l.)—मरकण्टे ।
8 Skd—वेदमाता ।
9 Pdm—पारापारे तटे स्थिता ; DBh—पारावारातटे स्मृता ; Skd—पारा पारातटे मुने ।
10 Pdm—महापद्मा ।
11 Pdm—तु शङ्करी ; DBh—°त्वतिशाङ्करी ; Skd—कार्त्तिके चैव शाङ्करी ।
12 Pdm—सिन्धुसङ्गमे ।
13 DBh—सिद्धवने ; Skd—सिद्धवटे ; Pdm—उमा सिद्धवने ।
14 Pdm, DBh—लक्ष्मीरनङ्गा ; Skd—लक्ष्मीस्तरङ्गा ।
15 Skd—किष्किन्ध° ।
16 Pdm—च ।
17 DBh—तुष्टिर्विश्वेश्वरी ; Mts—पुष्टिर्विश्वेश्वरे ; Skd—पुष्टिर्वस्त्रेश्वरे ।
18 Pdm—शुद्धा माता ।

शङ्खोद्धारे ध्वनिर्नाम [1] धृतिः पिण्डारके तथा ।
काला [2] तु चन्द्रभागायामच्छोदे शिवकारिणी [3] ॥ २३ ॥
वेण्णायाममृता नाम [4] बदर्यामुर्वशी तथा ।
औषधी [5] चोत्तरकुरौ कुशद्वीपे कुशोदका ॥ २४ ॥
मन्मथा हेमकूटे तु मुकुटे [6] सत्यवादिनी ।
अश्वत्थे वन्दनीया [7] तु निधिर्वैश्रवणालये ॥ २५ ॥
गायत्री वेदवदने पार्वती शिवसन्निधौ ।
देवलोके [8] तथेन्द्राणी ब्रह्मास्येषु [9] सरस्वती ॥ २६ ॥
सूर्यविम्बे प्रभा नाम मातृणां वैष्णवी मता ।
अरुन्धती सतीनान्तु रामासु च तिलोत्तमा ॥
चित्ते [10] ब्रह्मकला नाम शक्तिः सर्वशरीरिणाम् ॥ २७ ॥ [11]
एतदुद्देशतः [12] प्रोक्तं नामाष्टशतमुत्तमम् ।
अष्टोत्तरञ्च तीर्थानां शतमेतदुदाहृतम् ॥ २८ ॥

APPENDIX III

Evolution of the Dakṣayajña Story.

दक्षयज्ञकथामूलम्

(*a*) प्रथिष्ट यस्य वीरकर्मिमिष्णदनुष्ठितं नु नर्यो अपौहत् ।
पुनस्तदा वृहति यत् कनाया दुहितुरा अनुभृतमनर्वा ॥

---

1 Mts *a*—धरा नाम ।

2 DBh—कला ।

3 DBh—शिवधारिणी ; Pdm—सिद्धिदायिनी ; Skd—शक्तिधारिणी ।

4 Pdm—देवी ।

5 Mts *b*—ओषधी ; DBh—औषधिश्चोत्तर° । Cf. औसज in the *V.S.*

6 DBh, Pdm, Skd—कुमुदे ।

7 Skd—वन्दिनीका ।

8 DBh—वेदलोके ।

9 Pdm, Skd—ब्रह्मास्ये तु ।

10 Pdm—चित्रे ।

11 Skd adds after this line : शूलेश्वरी भृगुक्षेत्रे भगौ सौभाग्यसुन्दरी ।

12 Pdm—एतद्भक्त्या मया ;

DBh—इमान्यष्टशतानि स्युः पीठानि जनमेजय ।
तत्संख्यकास्तदीशान्यो देव्यश्च परिकीर्त्तिताः ॥
सतीदेव्यङ्गभूतानि पीठानि सन्ति तानि च ।
अन्यान्यपि प्रसिद्धानि यानि मुख्यानि भूतले ॥

मध्या यत्कर्त्वमभवदभीके कामं कृण्वाने पितरि युवत्याम्।
मनानग्रेतो जहतुर्वियन्ता सानौ निषिक्तं सुकृतस्य योनौ॥
पिता यत् स्वां दुहितरमधिष्कन् क्ष्मया रेतः संजग्मानो निषिञ्चत्।
स्वाध्योऽजनयन् ब्रह्म देवा वास्तोष्पतिं व्रतपां निरतक्षन्॥

(ऋग्वेद, १०।६१।५-७)

(*b*) प्रजापतिर्ह वै स्वां दुहितरमभिदध्यौ दिवं वोषसं वा मिथुन्येनया स्यामिति। तां सम्बभूव। तद्वै देवानामाग आस य इत्थं स्वां दुहितरमस्माकं स्वसारं करोतीति। ते ह देवा उचुः। योऽयं देवः पशूनामीष्टेऽतिसंधं वा अयं चरति य इत्थं स्वां दुहितरमस्माकं स्वसारं करोति विध्येममिति। तं रुद्रोऽभ्यायत्य विव्याध। तस्य सामि रेतः प्रचस्कन्द। तथेन्नूनं तदास। तस्मादेतदृषिणाभ्यनूक्तम्। पिता यत्स्वां दुहितरमधिष्कन् क्ष्मया रेतः संजग्मानो निषिञ्चदिति। तदाग्निमारुतमित्युक्थं तस्मिंस्तद्व्याख्यायते यथा तद्देवा रेतः प्राजनयन्। तेषां तदा देवानां क्रोधो व्यैदथ प्रजापतिमभिषज्यंस्तस्य तं शल्यं निरकृन्तन्। स वै यज्ञ एव प्रजापतिः। ते होचुः। उपजानीत यथेदं नामुयासत्कनीयो ह्या हुतेर्यथेदं स्यादिति। ते होचुः। भगायैनद्दक्षिणत आसीनाय परिहरत तद्भगः प्राशिष्यति तद्यथाहुतमेवं भविष्यतीति। तद्भगाय दक्षिणत आसीनाय पर्याजह्रुः। तद्भगोऽवेक्षां चक्रे। तस्याक्षिणी निर्ददाह। तथेन्नूनं तदास। तस्मादाहुरन्धो भग इति। ते होचुः। नो न्वेवात्राशमत्पूष्णऽएनत् परिहरतेति। तत्पूष्णे पर्याजह्रुः। तत्पूषा प्राश। तस्य दतो निर्जघान। तथेन्नूनं तदास। तस्मादाहुरदन्तकः पूषेति। *** (शतपथब्राह्मण-माध्यन्दिनशाखा। १।७।४। १–७।

(*c*) प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य आहुरुषसमित्यन्ये। तामृश्यो भूत्वा रोहितं भूतामभ्यैत्। तं देवा अपश्यन् न कृतं वै प्रजापतिः करोतीति। ते तमैच्छन्य एनमारिष्यत्येतमन्योन्यस्मिन्नाविन्दन्। तेषां या एव घोरतमास्तन्व आसंस्ता एकधा समभरंस्ताः संभृता एष देवोऽभवत्तदस्यै तद्भूतवन्नाम भवति वै स योऽस्यै तदेवं नाम वेद। तं देवा अब्रुवन्नयं वै प्रजापतिरकृतमकरिमं विध्येति। स तथेत्यब्रवीत् स वै वो वरं वृणा इति वृणीष्वेति। स एतमेव वरमवृणीत पशूनामाधिपत्यम्। तदस्यैतत्पशुमन्नाम पशुमान् भवति योऽस्यै तदेवं नाम वेद। तमाभ्यायत्याविध्यत्। स विद्ध ऊर्द्ध्व उदप्रपततमेतं मृग इत्याचक्षते। य उ एव मृगव्याधः स उ एव स या रोहित्सा रोहिणी य एवेषुस्त्रिकाण्डा स एवेषुस्त्रिकाण्डा। तद्वा इदं प्रजापते रेतः सिक्तमधावत्तत्सरोऽभवत्। ते देवा अब्रुवन् मेदं प्रजापते रेतो दुषदिति। यदब्रुवन् मेदं प्रजापते रेतो दुषदिति तन्मादुषमभवत्। *** (ऐतरेयब्राह्मण। ३।३३)

(*d*) प्रजापतिर्वै रुद्रं यज्ञान्निरभजत्। सोऽकामयत मेऽयमस्मा आकूतिः समृद्धिर्यो मा यज्ञान्निरभाक्षीदिति। स यज्ञमभ्यायम्याविध्य तदाविद्धं निरकृन्तत्। तत् प्राशित्रमभवत्तदुदयच्छत्तद्भगाय पर्यहरंस्तत्प्रतीक्षेत। तस्य चक्षुः परापतत्तस्मादाहुरन्धो वै भग इत्यपिहितं नेच्छेयमिच्छति तत् सवित्रे पर्यहरंस्तत्प्रत्यगृह्णात् तस्य पाणी प्रतिच्छेद तस्मै हिरण्मयौ प्रत्यदधुस्तस्माद्धिरण्यपाणिरिति स्तुतस्तत् पूष्णे पर्यहरंस्तत् प्राश्नात्तस्य दन्ताः परोप्यन्त तस्मादाहुरदन्तकः पूषा पिष्टभाजन इति। *** (गोपथब्राह्मण। २।१)।

(*e*) कस्यचित्त्वथ कालस्य दक्षनामा प्रजापतिः।
पूर्वोक्तेन विधानेन यक्षमाणोऽन्वपद्यत ॥
ततस्तस्य मखं देवाः सर्वे शक्रपुरोगमाः।
गमनाय समागम्य बुद्धिमापेदिरे तदा ॥
ते विमानैर्महात्मानो ज्वलनार्कसमप्रभैः।
देवस्यानुमते गच्छन् गङ्गाद्वारमिति श्रुतिः ॥
प्रस्थिता देवता दृष्ट्वा शैलराजसुता तदा।
उवाच वचनं साध्वी देवं पशुपतिं पतिम् ॥
भगवन् क्व नु यान्त्येते देवाः शक्रपुरोगमाः।
ब्रूहि तत्त्वेन तत्त्वज्ञ संशयो मे महानयम् ॥

महेश्वर उवाच ॥

दक्षो नाम महाभागे प्रजानां पतिरुत्तमः।
हयमेधेन यजते तत्र यान्ति दिवौकसः ॥

उमोवाच ॥

यज्ञमेतं महादेव किमर्थं नाधिगच्छसि।
केन वा प्रतिषेधेन गमनं ते न विद्यते ॥

महेश्वर उवाच ॥

सुरैरेव महाभागे पूर्वमेतदनुष्ठितम्।
यज्ञेषु सर्वेषु मम न भाग उपकल्पितः ॥
पूर्वोपायोपपन्नेन मार्गेण वरवर्णिनि।
न मे सुराः प्रयच्छन्ति भागं यज्ञस्य धर्मतः ॥

उमोवाच ॥

भगवन् सर्वभूतेषु प्रभावाभ्यधिको गुणैः।
अजय्यश्चाप्यधृष्यश्च तेजसा यशसा श्रिया ॥
अनेन ते महाभाग प्रतिषेधेन भागतः।
अतीव दुःखमुत्पन्नं वेपथुश्च ममानघ ॥

भीष्म उवाच ॥
एवमुक्त्वा तु सा देवी तदा पशुपतिं पतिम् ।
तुष्णीम्भूताभवद्राजन् दह्यमानेन चेतसा ॥
अथ देव्या मतं ज्ञात्वा हृद्गतं यच्चिकीर्षितम् ।
स समाज्ञापयामास तिष्ठ त्वमिति नन्दिनम् ॥
ततो योगबलं कृत्वा सर्वयोगेश्वरेश्वरः ।
तं यज्ञं स महातेजा भीमैरनुचरैस्तदा ॥
सहसा घातयामास देवदेवः पिनाकधृक् ॥ * * *
(महाभारत ।१२।२८३।१९-३३) ।

(*f*) * * * केचिद्बभञ्जुः प्राग्वंशं पत्नीशालां तथापरे ।
सद आग्नीध्रशालाञ्च तद्विहारं महानसम् ॥
रुरुजुर्यज्ञपात्राणि तथैकेऽग्नीननाशयन् ।
कुण्डेष्वमूत्रयन् केचिद्बिभिदुर्वेदिमेखलाः ॥
अवाधन्त मुनीनन्ये एके पत्नीरतर्जयन् ।
अपरे जगृहुर्देवान् प्रत्यासन्नान् पलायितान् ॥
भृगुं बबन्ध मणिमान् वीरभद्रः प्रजापतिम् ।
चण्डेशः पूषणं देवं भगं नन्दीश्वरोऽग्रहीत् ॥
सर्व एवर्त्विजो दृष्ट्वा सदस्याः सदिवौकसः ।
तैरर्द्यमानाः सुभृशं ग्रावभिर्नैकधाद्रवन् ॥
जुह्वतः स्रुवहस्तस्य श्मश्रूणि भगवान् भवः ।
भृगोर्लुलुञ्चे सदसि योऽहसत् श्मश्रु दर्शयन् ॥
भगस्य नेत्रे भगवान् पातितस्य रुषा भुवि ।
उज्जहार सदःस्थोऽक्ष्णा यः शपन्तमसूसुचत् ॥
पूष्णो ह्यपातयद्दन्तान् कलिङ्गस्य यथा बलः ।
शप्यमाने गरिमणि योऽहसद्दर्शयन् दतः ॥ * * *
(भागवतपुराण ।४।५।१४-२१) ।

(*g*) * * * वीरभद्रोऽपि दीप्तात्मा शक्रस्यैवोद्यतं करम् ।
व्यष्टम्भयददीनात्मा तथान्येषां दिवौकसाम् ॥
भगस्य नेत्रे चोत्पाट्य करजाग्रेण लीलया ।
निहत्य मुष्टिना दन्तान् पूष्णश्चैवमपातयत् ॥
तथा चन्द्रमसं देवं पादाङ्गुष्ठेन लीलया ।
धर्षयामास बलवान् स्मयमानो गणेश्वरः ॥
वह्नेर्हस्तद्वयं छित्त्वा जिह्वामुत्पाट्य लीलया ।
जघान मूर्ध्नि पादेन मुनीनपि मुनीश्वराः ॥
तथा विष्णुं सगरुडं समायान्तं महाबलः ।
विव्याध निशितैर्बाणैः स्तम्भयित्वा सुदर्शनम् ॥ * * *
(कूर्मपुराण ।१।१५।६०-६४) ।

APPENDIX IV

Date of the Tantrasāra.

The celebrated Tantric encyclopedia entitled *Tantrasāra*, composed or rather compiled by the great Bengali leader of Tantric thought named Kṛṣṇānanda, is well known to all students of the Tantra literature. In the colophons added to some of the chapters of the *Tantrasāra* the author calls himself 'Mahāmahopādhyāya-Kṛṣṇānanda-Vāgīśa-Bhaṭṭācārya'; but later writers usually refer to him as Kṛṣṇānanda Āgamavāgīśa. *Vāgīśa* seems to have been an abbreviated form of *Āgamavāgīśa*.

The late Mr. N. N. Vasu gave the following description of the family, to which Kṛṣṇānanda Āgamavāgīśa, author of the *Tantrasāra*, belonged, in the *Vārendra-Brāhmaṇa-Vivaraṇa* Volume of his *Vaṅger Jātīya Itihāsa* (in Bengali): 'This family is known in the community of the Vārendra Brāhmaṇas as the Kāśyapa-gotrīya Maitras of Maṇḍalajānī. It originally flourished at Āgameśvarī-talā at Śrīdhāma-Navadvīpa; but later, owing to an expansion of the family, its members scattered themselves over different parts of Bengal. A branch of the family still lives at Śrīdhāma and is devoted to the worship of the goddess Āgameśvarī' (p. 157). A number of traditions about Kṛṣṇānanda's religious life have also been quoted in the work. In connection with the date of Kṛṣṇānanda Āgamavāgīśa, Mr. Vasu says (*loc. cit.*), 'Kṛṣṇānanda, Śrīcaitanya and Raghunātha Śiromaṇi were co-students at the Catuṣpāṭhī of the same Guru at Navadvīpa. At first Kṛṣṇānanda and Caitanya were great friends; but dissension separated them when Caitanya preferred to worship Kṛṣṇa according to the principle known as the Sakhī-bhāva. Kṛṣṇānanda requested his friend not to take up the new course, but was insulted; and from that time they began to preach the Śākta and Vaiṣṇava doctrines separately. Kṛṣṇānanda attained perfection with the Śakti-mantra and conceived and popularized the form of the image of the goddess Kālī.[1] Before this, Kālī was usually worshipped at a Ghaṭa. The Ghaṭa established for the purpose of worshipping the goddess by Kṛṣṇānanda at the temple of Āgameśvarī at Navadvīpa still exists and a large number of Śāktas flock to it for worshipping Mahāmāyā.'

The story narrated by Mr. Vasu invites comments. In the first place, we know that Kṛṣṇānanda began his work with an adoration to Lord Kṛṣṇa, identified with Viṣṇu (*Tantrasāra*, Vaṅgavāsī edition, p. 1):

नत्वा कृष्णपदद्वन्द्वं ब्रह्मादिसुरपूजितम् ।
गुरुञ्च ज्ञानदातारं कृष्णानन्देन धीमता ॥

---

[1] According to a tradition recorded by Vasu, Kṛṣṇānanda was ordered by the goddess Kālī in a dream to popularize the form of her image. On being questioned as to how the form could be realized, the goddess replied that it would be revealed to the devotee the next morning. Early next day when Kṛṣṇānanda came out of his house, he found a young cowherdess engaged in preparing cowdung cakes. She was standing in the *ālīḍha* pose (with the right knee thrown to front and the left leg firm behind in a slanting position) and had a large ball of cowdung in her left hand and a small one in the right, upraised to be set on a wall in the form of a cake. On the sudden consciousness of her being noticed by Kṛṣṇānanda the woman felt very much ashamed and pressed her tongue, that lolled, with her teeth (cf. Bengali লজ্জায় জিব কাটা which gives an expression to the feeling of shame). The appearance of the cowherdess as seen by Kṛṣṇānanda that morning was popularized by him as the form of the image of Dakṣiṇa-Kālī. Kṛṣṇānanda began to worship small images of this type made of mud by himself every day to be immersed early next morning in the waters of the Ganges. Later the king of Navadvīpa introduced the worship of large images of the same type on the newmoon of the month of Kārttika.

This seems to show that Kṛṣṇānanda Āgamavāgīśa was not initiated into the Śakti-mantra, but was a Tantric devotee who received his initiation into the Vaiṣṇava formula.[1] In the Śyāmā or Kālī section of the *Tantrasāra*, the author quotes the opinions of various Tantra works, but does not express any special view of his own (cf. *op. cit.*, p. 472ff; also Pūrṇānanda's *Śyāmārahasya*, ed. R. N. Chatterji, pp. 11-12).

In the second place, it is extremely difficult to regard Kṛṣṇānanda Āgamavāgīśa as a co-student of the celebrated Vaiṣṇava saint Caitanya of Navadvīpa and the great Bengali logician Raghunātha Śiromaṇi. Caitanya was born on the full-moon day of Phālguna in Śaka 1407, corresponding to the 18th February, 1486 A.D., and died at the age of 48 on the seventh *tithi* of the bright half of Āṣāḍha in Śaka 1455 (1533 A.D.). *Vide* D. C. Sen, *Vaṅgabhāṣā O Sāhitya*, 5th edition, pp. 256, 266; R. G. Bhandarkar's Collected Works, Vol. IV, pp. 118-19. According to the *History of Indian Logic* (pp. 463–65) by S. C. Vidyabhushan, Raghunātha Śiromaṇi flourished between 1477 and 1547 A.D., although recent writers on the subject suggest that the Śiromaṇi was born about 1460–65 A.D., composed his famous *Tattvacintāmaṇidīdhiti* about 1490–1500 A.D. and was therefore about a generation earlier than Caitanya (cf. *V.S.P.P.*, Vol. L, p. 13; LIII, pp. 1, 3). If, therefore, the story narrated by Mr. Vasu has to be believed, we have to assume that Kṛṣṇānanda was born about 1480 A.D. and died sometime about the middle of the sixteenth century. There is, however, evidence to show that the *Tantrasāra* was composed several years after 1577 A.D.

The great Tantric teacher Pūrṇānanda Paramahaṃsa, who was an inhabitant of the Mymensing District of Bengal (cf. Introduction to the Calcutta Sanskrit Series edition of the *Śrītattvacintāmaṇi*), wrote his famous work entitled *Śrītattvacintāmaṇi* in the Śaka year 1499 corresponding to 1577 A.D. This is clear from the following passage of the work: श्रीमत्परमहंस-परिव्राजक-श्रीगुरु-ब्रह्मानन्द-मुखारविन्द-निस्यन्दमान-परमरहस्याति-रहस्य-निगममकरन्द-सन्दोहतुन्दिलानन्दः श्रीपूर्णानन्दपरमहंसः श्रीतत्त्वचिन्तामणिं चतुर्दशशताधिकनवनवतिशकाब्दे वितनोति । The *Śrītattvacintāmaṇi* by Pūrṇānanda has been quoted by Kṛṣṇānanda Āgamavāgīśa in his *Tantrasāra* (p. 155). Now even if Pūrṇānanda and Kṛṣṇānanda were contemporaries, it is difficult to believe that in that age, when there was little facility of communication, Kṛṣṇānanda of Navadvīpa in the Nadia District could have information about the work of Pūrṇānanda of Mymensing and secure a copy of it immediately after its composition. The *Tantrasāra* thus does not appear to have been composed much earlier than *circa* 1600 A.D. If, under the circumstances, it is conjectured that the *Tantrasāra* was written by Kṛṣṇānanda when he was more than hundred years old, the story of Kṛṣṇānanda, Caitanya and Raghunātha Śiromaṇi having been co-students under the same Guru may not be altogether impossible. But such a suggestion, if not wholly absurd, is certainly rather improbable. It can hardly be accepted without any corroborative evidence. The *Tantrasāra*

---

[1] That Kṛṣṇānanda was not anti-Vaiṣṇava is even admitted by a tradition recorded by Vasu, according to which Śākta Kṛṣṇānanda had a brother named Sahasrākṣa who was a Vaiṣṇava. One day a number of bananas, preserved by Kṛṣṇānanda with a view to offering them to the goddess Āgameśvarī (Kālī), was, during his absence, dedicated by Sahasrākṣa to his own tutelary deity, the god Kṛṣṇa-Viṣṇu. At this Kṛṣṇānanda became very much annoyed. But when at night the Āgamavāgīśa was worshipping the goddess, he and his Vaiṣṇava brother, who happened to be near him, noticed with surprise that the goddess had Gopāla (child Kṛṣṇa) on her lap and was feeding him with bananas like a mother. Thereafter the two brothers realized that there was really no difference between the Vaiṣṇava and Śākta forms of worship.

also quotes Rāghava Bhaṭṭa (*loc. cit.*, p. 16 *et passim*), who wrote the *Padārthādarśa* commentary on the *Śāradātilaka* and flourished in 1493-94 A.D., and the *Tantrakaumudī* (*loc. cit.*, p. 374) composed by the Maithila Devanātha at the court of king Malladeva Naranārāyaṇa of Kamta (1555–87 A.D.; cf. *Pravāsī*, 1354 B.S., pp. 507-08).

In the preface to the *Kālikhaṇḍa* or Section I of the *Śaktisaṅgama Tantra*, published in the Gaekwad Oriental Series, Dr. B. Bhattacharya has made an attempt to determine the date of the composition of the *Śaktisaṅgama* and has incidentally discussed the date of the *Tantrasāra* by Kṛṣṇānanda Āgamavāgīśa. Dr. Bhattacharya says that Kṛṣṇānanda, author of the *Tantrasāra*, was a disciple of Pūrṇānanda Paramahaṃsa, author of the *Śrītattvacintāmaṇi*. As the preceptor, i.e. Pūrṇānanda, wrote his work in 1577 A.D., the disciple, i.e. Kṛṣṇānanda, in Dr. Bhattacharya's opinion, may have composed his *Tantrasāra* about thirty years later, that is to say, about 1607 A.D. Unfortunately however the suggestion that the author of the *Tantrasāra* was a disciple of that of the *Śrītattvacintāmaṇi* is absolutely unwarranted.

It is well known that Tantric devotees regard the Guru or preceptor as equal or even superior to all the gods as an object of veneration. Kṛṣṇānanda himself quotes the following verse in praise of the Guru from the *Jñānārṇava Tantra* in his *Tantrasāra* (p. 2):

गुरुः पिता गुरुर्माता गुरुर्देवो गुरुर्गतिः ।
शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ॥

In this connection, the attention of scholars may be drawn to the views of various Tantra works quoted in the Guru-śiṣya-Prakaraṇa of the *Prāṇatoṣaṇī Tantra* (Vasumatī edition, pp. 91–103), especially to the following citations from the *Guru Tantra* and the *Guptasādhana Tantra* (cf. *ibid.*, pp. 94-95):

न गुरोरधिकं शास्त्रं न गुरोरधिकं तपः ।
न गुरोरधिकं मन्त्रो न गुरोरधिकं फलम् ॥
न गुरोरधिका देवी न गुरोरधिकः शिवः ।
न गुरोरधिका मूर्तिर्न गुरोरधिको जपः ॥

(गुरुतन्त्र)

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुस्तीर्थं गुरुर्यज्ञो गुरुर्दानं गुरुर्जपः ॥
गुरुरग्निर्गुरुः सूर्यः सर्वं गुरुमयं जगत् ॥

(गुप्तसाधनतन्त्र)

The section from Pūrṇānanda's *Śrītattvacintāmaṇi* quoted above, in which the author introduces himself as a disciple of another Tantrācārya named Brahmānanda Paramahaṃsa, demonstrates very clearly how much respectfully a Tantric devotee is expected to refer to his Guru. In his *Śyāmārahasya* Pūrṇānanda refers to himself as श्रीगुरुपादपद्मपरामोदामृतसंप्लावितः पूर्णानन्दगिरिः । There is a distinct injunction as regards the mention of

one's preceptor in the *Kulārṇava Tantra* from which the following verses have been quoted in the *Prāṇatoṣaṇī Tantra* (p. 103):

श्रीगुरुं कुलशास्त्राणि पूजास्थानानि यानि च ।
भक्त्या श्रीपूर्वकं देवि प्रणम्य च प्रकीर्तयेत् ॥
गुरुं नाम्ना न भाषेत जपकालादृते प्रिये ।
श्रीनाथदेवस्वामीति विवादे साधने वदेत् ॥

It is very interesting to note in this connection that the following lines of the *Tantrasāra* (p. 489) attributes a particular view to Pūrṇānanda Paramahaṃsa and refutes it categorically:

